# श्रीविवेकानन्दप्रभातप्राञ्जलिः

समाधिस्थः शिवः स्वलोके निर्भरं   जनानां क्रन्दनाद् भवाग्नौ भीषणे ।
प्रदग्धानां प्रबोधितस्त्वं ह्यागतः   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥१ ॥

नरेन्द्रः शैशवे  नरेन्द्रो यौवने    नरेन्द्रः क्रीड़ने  नरेन्द्रः शिक्षणे ।
नरेन्द्रः पालने  नरेन्द्रो ह्यर्पणे    विवेकानन्द ते प्रभाते प्राञ्जलिः ॥२ ॥

हरीन्द्रश्चेष्टितैः  कलाज्ञो गायनैः   परिज्ञानैर्बुधो महर्षिर्दर्शनैः ।
यतीन्द्रोऽसक्तिभिर्भवान् यन्नास्ति किं   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥३ ॥

मुमुक्षा दर्शिताभिंहंस धावनैः   विनैकां पादुकां नितान्तोन्मत्तवत् ।
समानं देहि मे मुमुक्षां मद्गुरो   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥४ ॥

गुरोङ्घ्र्युत्पले स्वमात्मानं ददौ   परीक्ष्यानन्तरं बहुप्रश्नैर्भृशम् ।
विशुद्धैः सेवनैर्भवांस्तं पिप्रिये   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥५ ॥

सुगन्धः श्रीगुरुर्भवान् वायुः खलु   स तूर्यं त्वं च भो महोच्चैर्घोषकः ।
गुरुः सुर्यस्तु हे किलादर्शो भवान्   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥६ ॥

स्वधर्मश्रेष्ठतां सगर्वं शंसतां   जनानां ध्रष्टता त्वयैवाभाज्यहो ।
स्वधर्मो वैदिको ह्यनर्घो दर्शितः   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥७ ॥

यतेऽनूरुस्तव प्रणामं दास्यति   प्रफुल्लं षट्पदैः प्रसूनं प्रात्रतम् ।
तवार्थं  कोकिलो मनोज्ञं कूजति   विवेकानन्द ते प्रभाते प्राञ्जलिः ॥८ ॥